

अथश्री। मद्भागवतद्वादशस्कंधचूर्णिकाप्रारभ्यते॰

श्रीगणेशायनमः श्रीसरस्वत्यैनमः श्रीमत्कुलदेवतायैनमः अथद्वादशस्कंधोव्याख्यायते राजोवाच कृष्णेस्व-
धामानुगतेसतिपृथ्व्यांकस्यवंशःअभवत् तद्वद श्रीशुकउवाच बृहद्रथवंशीयाः भाव्याः श्रुतश्रवाइत्यादयःरिपुंजयांताः
नवमेनिरूपिताः तत्रयोऽस्यःरिपुंजयः सएवपुरंजयःतस्यअमात्याःशुनकःसःस्वामिनंरिपुंजयंहत्वास्वसुतंप्रद्योतसंज्ञंराजानंक
रिष्यति तस्मात् पालकः त॰ विशाखयूपः त॰ नंदिवर्धनः एतेप्रद्योतसंज्ञाः पंचनृपाः १३८ वर्षाणिकलौ भूमिं भोक्ष्यंति ततःभावीशि
शुनागः त॰ काकवर्णः त॰ क्षेमधर्मा त॰ क्षेत्रज्ञः त॰ विधिसारः त॰ अजातशत्रुः त॰ दर्भकः त॰ अजयः त॰ नंदिवर्धनः त॰ महानंदी ए
ते १० नृपाः ३६० वर्षाणि भुवं भोक्ष्यंति महानंदिसुतः शूद्रीगर्भोद्भवः नंदनामाभावी ततःपरंअधार्मिकाःशूद्रप्रायाः नृपाः भविष्यंति सः
नंदः एकछत्रांपृथ्वींपालयिष्यति तस्यसुमाल्यप्रमुखाः अष्टौसुताः शतंवर्षाणिमहीं भोक्ष्यंति ततःएतान् नवनंदान् कश्चिच्चाण-
क्यःद्विजःउन्मूलयिष्यति ततःमौर्यसंज्ञाःनृपाःइमां भोक्ष्यंति सःद्विजःमौर्यप्रथमंचंद्रगुप्तंराज्येऽभिषेक्ष्यति तस्यपुत्रःवारिसारः
त॰ अशोकवर्धनः त॰ सुयशाः त॰ संगतः त॰ शालिशूकः त॰ सोमशर्मा त॰ शतधन्वा त॰ बृहद्रथः तथापराशराद्युक्तोदशरथश्च
एवंएतेदश १३७ वर्षाणिभुवं भोक्ष्यंति बृहद्रथस्यसेनापतिःपुष्पमित्रःसःस्वामिनंहत्वाराज्यंकरिष्यति सःशुंगप्रथमः त॰
अग्निमित्रः त॰ सुज्येष्ठः त॰ वसुमित्रः त॰ भद्रकः त॰ पुलिंदः त॰ घोषः त॰ वज्रमित्रः त॰ भागवतः त॰ देवभूतिः एतेदशशुंगाः ११२
वर्षाणिभूमिंभोक्ष्यंति ततःशुंगंदेवभूतिंहत्वातदमात्यःकण्वोवसुदेवःराज्यंकरिष्यति त॰ भूमित्रः त॰ नारायणः त॰ सुशर्मा ए
ते ४ काण्वायनाः ३४५ वर्षाणिभुवंभोक्ष्यंति ततःकाण्वंसुशर्माणंहत्वातद्भृत्याःआंध्रजातीयःशूद्रःकंचित्कालंगांभोक्ष्यति ततःतद्भ्राता
कृष्णनामाभूपःभविष्यति त॰ श्रीशांतकर्णः त॰ पौर्णमासः त॰ लंबोदरः त॰ विकलः त॰ मेघस्वातिः त॰ अटमानः त॰ अनिष्टकर्मा त॰

हालेयः त॰ तलकः त॰ पुरीषभीरुः त॰ [illegible]नंदनः त॰ चकोरः त॰ बहुसंज्ञकाः ८ पुत्राः नवमः शिवस्वातिरिति त॰ गोमती ततः पुरी-
मान् त॰ मेदशिराः त॰ शिवस्कंदः त॰ यज्ञश्रीः त॰ विजयः त॰ चंद्रविज्ञः त॰ लोमधिः एते त्रिंशत् राजानः ४५६ वर्षाणि भूमिं भोक्ष्यंति
त॰ आभीराः ७ ततः गर्दभिनः नृपाः १० कंकाः १६ भविष्यंति ततः यवनाः ८ ततः पुष्परसाः १४ ततः गुरुंडाः १० ततः मौनाः ११ एते सर्वे मौ
नव्यतिरिक्ताः ६५ भूपाः १०९९ वर्षाणि भुवं भोक्ष्यंति मौनाः भूपाः ३००० वर्षाणि भूमिं भोक्ष्यंति मौनेषु मृतेषु किलकिलायां पुर्यां
भूतनंदः वंगिरिः शिशुनंदिः तद्भ्राता यशोनंदिः प्रवीरकः एते राजानः १०६ वर्षाणि भविष्यंति तेषां भूतनंदादीनां यथायथं सुताः
१३ बाल्हीकनामानः भविष्यंति अथ कश्चित् पुष्पमित्रः नृपः भविष्यति तस्य दुर्मित्रः तथा आंध्राः ७ कोशलाः ७ वैदूरपतयः निष
धाश्च एते एककालाः मांडलिकाः राजानः बाल्हिकेभ्यः एव भविष्यंति ततः मागधानां विश्वस्फूर्जिर्भविता सः विप्रादिवर्णान् पु
लिंदयदुमद्रकसंज्ञान् म्लेंच्छप्रायान् करिष्यति सत्वअसतीः प्रजाः पालयिष्यति सः क्षत्रं उत्साद्य पद्मवत्यां पुरि वसन् गंगाद्वा-
रमारभ्य प्रयागपर्यंतं भूमिं भोक्ष्यति ततः सौराष्ट्राः आवंत्या आभीराः शूराः अर्बुदमालवाः द्विजाः व्रतहीनाः शूद्रप्रायाः नृपाश्च
भविष्यंति एते सर्वे म्लेंच्छप्रायाः नृपाश्च सिंधोस्तटं चंद्रभागां कौंतीं काश्मीरमंडनं समकालं भोक्ष्यंति एवं एते सर्वे अधर्मानृत
पराः फल्गुदाः तीव्रमन्यवः स्त्रीबालगोद्विजघ्नाः परदारधनाहृताः अल्पायुषः संस्कारहीनाः रजस्तमोव्याप्ताः संतः प्रजाः भक्ष
यिष्यंति तन्नाथास्ते जनपदाः स्तच्छीलाचारवादिनः अन्योन्यतो राजतश्च क्षयं यास्यंति पीडिताः ४१ इति द्वादशे प्रथमः १
श्रीशुक उवाच ततश्चानुदिनं धर्मः सत्यं शौचं दया क्षमा कालेन बलिना राजन्नंक्ष्यत्यायुर्बलं स्मृतिः १ कलिधर्मानाह कलौ
वित्तमेव नृणां जन्माचारगुणोदयः धर्मन्यायव्यवस्थायां बलमेव कारणम् दांपत्ये अभिरुचिरेव हेतुः क्रयविक्रियादिव्यवहारे-

कपटम् विप्रत्वे सूत्रधारणम् आश्रमाणां ज्ञाने चिन्हमेव कारणम् तत्त्वाचारः पांडित्ये बहुभाषणम् हेतुः असाधुत्वे अनाढ्यतैव सा-
धुत्वे दंभ एव हेतुः उद्वाहे स्वीकार एव हेतुः स्नानमेव अलंकारः दूरे वर्तमानः जलाशयः स एव तीर्थं न तु गुर्वादिः लावण्ये केशधारणं उदरंभ
रता पुरुषार्थः सत्यत्वे धार्ष्ट्यमेव कुटुंबभरणं दाक्ष्यम् यशोर्थं धर्मसेवनम् एवं दुष्टाभिः प्रजाभिः क्षितौ व्यासायां ब्रह्मविट्क्षत्रशूद्राणां
मध्ये यः बलिः सः नृपो भविता किंच लुब्धैः निर्घृणैः दस्युधर्मभिः राजन्यैः अपहृतदारद्रविणाः प्रजाः गिरिकाननं यास्यंति शाकमूल
मांसमधुफलपुष्पभोजनाः प्रजाः अनावृष्ट्या दुर्भिक्षकरैः शीतवातातपादिभिः क्षुत्तृड्व्याधिभिः संतापेन च पीडिताः सत्यः नंक्ष्यं
ति कलौ त्रिंशद्विंशति वा वर्षाणि नृणां परमायुः एवं नृणां क्षीणेषु देहेषु वर्णाश्रमिणां धर्मे वेदपथे नष्टे पाखंडप्राये धर्मे चोरप्राये
षु राजसु चौर्यानृतहिंसादिप्रायेषु नृषु शूद्रप्रायेषु च वर्णेषु छागप्रायासु गोषु गृहप्रायेषु आश्रमेषु यौनप्रा॰ बंधुषु अणुप्राया
सु ओषधीषु शमीप्रायेषु वृक्षेषु विद्युत्प्रायेषु मेघेषु धर्महीनेषु गृहिषु सत्सु इत्थं कलौ गतप्राये धर्मत्राणाय शंभलग्राममुख्य
स्य विष्णुयशसः विप्रस्य गृहे कल्किः भगवान् प्रादुर्भविष्यति सः आशुगं अश्वं आरुह्य भूमौ विचरन् नृपलिंगच्छदो दस्यून्
कोटिशो निहनिष्यति अथ सर्वेषां मनांसि विशदानि भविष्यंति प्रजाविसर्गः स्थूलो भविष्यति यदा कल्किः हरिः भविता तदा
कृतयुगं सात्त्विकी प्रजाप्रसूतिश्च भविष्यति किंच यदा चंद्रसूर्यबृहस्पतीनां पुष्यर्क्षे समकाले एव प्रवेशः तदैव कृतयुगप्रवृत्तिः
स्यात् हे राजन् अतीताः वर्तमानाः भाव्याः ये नृपाः ते संक्षेपतः प्रोक्ताः किंच तव जन्मन आरभ्य नंदाभिषेकावधि वर्षाणि १४९८ भ
वंति हे राजन् देवर्षयः ७ एकस्मिन् २ ऋक्षे शतं शतं समाः तिष्ठंति ते अधुना मघासु विचरंति तदा कलिः प्रवृत्तः यदा च पू
र्वाषाढां यास्यंति तदा कलिः वृद्धिं प्राप्स्यति किंच यदहनि श्रीकृष्णः दिवं यातः तदैव प्रविष्टं कलिमिति पूर्वे प्राहुः कलौ ग

तेसतिपुनः कृतं भविष्यति तदामनः आत्मप्रकाशकंस्यात् एवंमानवोवंशः तथाविट्शूद्रविप्राणांच कथितः एतेषांपुरुषाणांम-
हात्मनांकीर्तिरेवभुविस्थिता किंच पूर्वोक्तौदेवावपि मरुतौकलेरंतेइह एत्यधर्मं प्रथयिष्यतः एवंक्रमेणचतुर्युगं भुविप्राणिषुव
र्तते हेराजन् एवंयेमयाप्रोक्ताः नृपाः अपरेचतेसर्वे भूमौममतांकृत्वा नाशंगताः येयेभूपतयोराजन् भुंजंति भुवमोजसा तेसर्वे
कालेनकथामात्रावशिष्टाःकृताः ४४ इतिद्वादशेद्वितीयः २ श्रीशुकउवाच अथस्वजयेव्यग्रान् नृपान् दृष्ट्वाइयंभूःह
सति अहोएतेमृत्योः क्रीडनकाः नृपाः मांविजिगीषंति येनकामेन फेनोपमेदेहेविश्वस्ताः येनृपाः तेषांएषःकामः मोघएवस्यात् त
मेवाह पूर्वंइंद्रियषड्वर्गंनिर्जित्यराजमंत्रिणःवशीकरिष्यामः ततःसचिवपौरादीन्जित्वापृथ्वींजेष्यामः इत्याशाबद्धहृदयान
पश्यंत्यंतिकेऽतकम् एवंकेचित्पुनर्मांजित्वा अतितृष्णयाअब्धिंविशंति यांमांविसृज्यमनवः तत्सुताश्चगताः तांमांअज्ञाः
नृपाःजेष्यंति मत्कृतेपितृपुत्राणां भ्रातृणांचविग्रहः भवति किंच इयंमहीममैवनतवनइतिवादिनः नृपाःमिथः घ्नंति म्रियंतेच
अहोपृथुः पुरूरवाः गाधिःनहुषः भरतः अर्जुनः मांधाता सगरः रामः खट्वांगः धुंधुहा रघुः तृणबिंदुः ययातिः शंतनुः शर्यातिःग-
यः भगीरथः कुवलयाश्वः ककुत्स्थः नैषधः नृगः हिरण्यकशिपुः वृत्रः रावणः नमुचिः शंबरः भौमः हिरण्याक्षः तारकः एतेअन्ये-
चसर्वेमयिममतांकृत्वाअवर्तंत तेसर्वेकालेनकथावशेषाःकृताः हेराजन् एषांकथाः ज्ञानवैराग्यविवक्षयातेकथिताः एताः
वाग्विलासमात्ररूपाः नतुपरमार्थकथनम् अतःकृष्णेभक्तिं इच्छुः पुरुषः तद्गुणानुवादंनित्यंशृणुयात् राजोवाच हे
भगवन्जनाः कलिदोषान् केनोपायेन नाशयंति तद्ब्रूहि तथायुगानि तद्धर्मान् प्रलयकल्पयोः मानंचवद श्रीशुक-
उवाच कृतेधर्मः चतुष्पात् वर्तते अत्रजनाः संतुष्टाः आत्मारामाः त्रेतायांधर्मपादानांतुर्यांशः अनृतहिंसाऽसंतोषविग्रह

रूपा धर्मपादैः शनैः हीयते तदा किंपं(?)पोनिष्ठाः नातिहिंस्राः प्रजाः ततः द्वापरे धर्मपादार्धं अधर्मपादैः ह्रसति तत्र जनाः स्वा-
ध्यायाध्ययनेरताः हृष्टाः आढ्याः वर्तंते कलौतु धर्मपादानांतुर्यांशः अवशिष्यते सोपि अंते नंक्ष्यति तदा प्रजाः दुराचाराः नि
र्दयाः दुर्भगा नीच प्रधानाः भविष्यंति एवंयुगवैषम्ये हेतुमाह यदा मनो बुद्धींद्रियाणि सत्त्वे वर्तंते तदा कृतयुगं प्रवृत्तं विद्या
न् यदा च काम्यकर्मसु नृणां प्रीतिः तदा राजसं त्रेतायुगं वि॰ यदा लोभः असंतोषः काम्यकर्मसु प्रीतिश्च तदा द्वापरं वि॰ य
दा मायानृतं तंद्रा निद्रा हिंसा दुःखं शोकः मोहः भयं दैन्यं तदा तामसः कलिः स्मृतः यद्धेतोः मर्त्याः क्षुद्रभाग्याः मंदमतयः निर्द्र-
व्याः बह्वाहाराः पुंश्चल्यः स्त्रियश्च भविष्यंति चोराधिकाः देशाः पाखंडदूषिताः वेदाः प्रजाभक्षाः नृपाः शिश्नोदरपराः द्वि
जाः ब्रह्मचारिणः विहिताचारशून्याः गृहस्थाः भिक्षाटनपराः वनस्थाः ग्रामवासाः यतयः द्रव्यलोलुपाः भविष्यंति किंच स्त्रि
यः ह्रस्वदेहाः महाहाराः कटुभाषिण्यः चौर्यमायोरुसाहसाः भविष्यंति नीचवैश्याः व्यवहारं वर्तयिष्यंति निर्द्रव्यं पतिं भृ
त्याः विपन्नं भृत्यं पतयः त्यक्ष्यंति पितृभ्रात्रादीन् हित्वा सौरत सौहृदाः ननंदृश्यालसंवादाः स्त्रैणाः नराः भविष्यंति शूद्राः
प्रतिगृहीष्यंति अधर्मज्ञाः धर्मं वक्ष्यंति किंच कलौ निरन्ने भूतले सति अनावृष्टिभयातुराः वासोन्नपानशयनव्यवाय-
स्नानभूषणैः हीनाः प्रजाः भविष्यंति किंच काकिणिकेप्यर्थे वैरं कृत्वा प्राणान् त्यक्ष्यंति पितरः पुत्रान् पुत्राः पितॄन् नरक्षि
ष्यंति हे राजन् कलौ पाखंडविभिन्नचेतसः मर्त्याः प्रायेण अच्युतं नयक्ष्यंति अहो म्रियमाणाः आतुरः विवशः यन्नामगृ
णन् विमुक्तकर्मार्गलः सन् उत्तमां गतिं प्राप्नोति तं नयक्ष्यंति अथ कलिदोषनिस्तारोपायमाह पुंसां चित्ते स्फुरितः भगवा ३
न् कलिकृतदोषान् हरति किंच श्रुतः संकीर्तितो ध्यातः पूजितश्चादृतोपिवा नृणां धुनोति भगवान् हृत्स्थो जन्मायुताशुभम्

ओ॰ ६ भ्रातृभार्याः भार्याभ्रातरः तैर्मंत्रालोचनं येषाम्

अपिच भगवति अनंते हृदिस्थे सति अंतरात्मा यथा शुद्धिं लभते तथा विद्यातप आदिभिः न हे राजन् तस्मात्केशवं हृदिस्थं कुरु कलेर्दोषनिधे राजन्नस्ति ह्येको महान् गुणः कीर्तनादेव कृष्णस्य [illegible]बंधः परं व्रजेत् कृते यद्ध्यायतो विष्णुं त्रेतायां यजतो मखैः द्वापरे परिचर्यायां कलौ तद्धरिकीर्तनात् इति द्वादशे तृतीयः श्रीशुकउवाच हे नृप परमाण्वादिः द्विपरार्द्धांतः काल: ते कथितः युगमानंच कथितम् अथ कल्पलयौ शृणु चतुर्युगस[illegible]ं ब्रह्मणः दिनं सः कल्पः यत्र मनवः १४ भवंति तदंते ना- वान् प्रलयः सा ब्रह्मी रात्रिः यत्र त्रयो लोकाः प्रलयाय कल्पंते एष नै[illegible]त्तिकः प्रलयः प्रोक्तः यत्र अनंतासनः नारायणः विश्वं संहृत्य शेते ब्रह्मा च तस्मिन् शेते इति अथ प्राकृतिकलयमाह ब्रह्मण[illegible] परार्द्धे आयुषि गते सति प्रकृतयः ७ महदहंकारपंचतन्मात्ररूपाः प्रलयाय कल्पंते एषः प्राकृतिकः प्रलयः यत्र अंडकोशः [illegible]यते तदा पर्जन्यः शतं वर्षाणि भूमौ न वर्षति तेन निरन्ने सति क्षुधार्दिताः प्रजाः अन्योन्यं भक्ष्यमाणाः सत्यः क्षयं यास्यंति ततः सांवर्तको रविः सर्वं रसं रश्मिभिः आकर्षति नैव मुं- चति ततः संकर्षणमुखोत्पन्नः अग्निः भूविवरान् दहति उपर्यधः समंताच्च शिखाभिः वन्हिसूर्ययोः दह्यमानं विभात्यंडं दग्ध गोमयपिंडवत् ततः संवर्तको वायुः वर्षाणां अधिकं शतं वाति ततः नृपमेघकुलानि वर्षशतं वर्षंति ततः एकोदकं विश्वं भवति तदा च भूमेः गंधं गुणं आपः ग्रसंति ग्रस्तगंधा भूः नश्यति ततः तेजः अपां रसं ग्रसते ताः आपः तेजसि लीयंते वायुः तेजसो रूपं ग्रसते तत्तेजः वायौ लीयते वायोः गुणं स्पर्शं खं ग्रसते सः वायुः खे लीयते तामसोहंकारः शब्दं ग्रसति सात्विकः देवान् ग्रसति राजसः इंद्रियाणि ग्रसति महान् अहंकारं ग्रसति महांतं त्रयो गुणाः ग्रसंते गुणान् प्रधानं ग्रसति सैव प्रकृतिः सा नित्या एषः प्राकृतिको लयः आत्यंतिकं लयमाह [illegible] ज्ञानेन सर्वप्रपंचप्रलयो भवति एषः आत्यंतिको लयः मोक्ष इत्युच्यते नित्यं लयमाह

ओ॰ ५ ब्रह्मणो निमित्तत्वात्, ओ॰ ७ प्रकृतीनां ब्रह्[illegible]डस्यै[illegible]यात्

नित्यदासर्वभूतानांब्रह्मादीनांपरंनष्ट उत्पत्तिप्रलयावेकेसूक्ष्मज्ञाःसंप्रचक्षते कुतइत्यतआह कालरूपस्रोतसोवेगेननदी-
प्रवाहदीपज्वालादीनांयाउच्चनीचावस्थास्ताः यथास्पष्टतयानदृश्यंते तद्वद्देहादेरपि इतिनित्यलयः एवंचतुर्विधोलयः
तेकथितः हेराजन् नारायणस्यलीलाकथाः संक्षेपेणतेकथिताः कार्त्स्न्येनवक्तुंअजोपिनेशः किंच संसारसिंधुंतर्तुमिच्छोः
पुंसः हरिलीलाकथारससेवनंविना अन्यः प्लवोन हेनृप एतांसंहितांऋषिर्नारायणः नारदायप्राह सः व्यासाय व्यासः मह्यंज
गौ इमांवेदतुल्यांसंहितांअसौसूतः नैमिषारण्ये ऋषिभ्यः वक्ष्यति श्रोतुः आदरदार्ढ्यायइयंसंप्रदायप्रवृत्तिरुक्ता इ
तिद्वादशेचतुर्थः ४ श्रीशुकउवाच अत्रानुवर्ण्यतेभीक्ष्णंविश्वात्माभगवान्हरिः यस्यप्रसादजोब्रह्मारुद्रःक्रोधस
मुद्भवः १ एवंभूतंहरिंशृण्वतः कुतोन्यस्मात् भयशंका हेनृपत्वंतु कृतार्थोऽसि अतः अहंमरिष्येइति इमांपशुबुद्धिंत्वंजहि
यथादेहः प्राक्अभूतएव अद्यजातः सः नंक्ष्यति नचैवंत्वंपूर्वंनाभूः नचाद्यजातोसि अतोननंक्ष्यसि ननुबीजांकुरवत् स्व-
स्मात्पुत्ररूपेणस्वयमेवभवति ततःपुनः अंकुरात् बीजमिवपौत्ररूपेणापिस्वयमेवभवति अतः तेषुनश्यत्सु कथंननंक्ष्यामी
तिचेत् तत्राह हेराजन् त्वंतुपुत्रपौत्रादिरूपवान्बीजांकुरवत् न भविष्यसि यतः देहादेःभिन्नः त्वं यथाअग्निःकाष्ठात् एवंचदे
हात्देहोजायते नात्मेति किंच यथास्वप्नेशिरश्छेदंस्वयंपश्यति एवंजागरणेपि यस्माद्देहस्यपंचत्वादिकंपश्यति तथाआत्म
नः इदंभ्रममात्रम् वस्तुतः आत्मा अजरामरः किंच यथाघटेभिन्नेघटाकाशः महाकाशःस्यात् एवंदेहेतत्त्वज्ञानेनलीनेस
तिजीवः पुनःब्रह्मसंपद्यते मनःदेहादीन्सृजति मनःप्रतिमायासृजति ततः मायाद्युपाधिसमुदायात्जीवस्यसंसारः न ४
वस्तुतः हेप्रभो एवंअनुमानगर्भिण्याबुद्ध्यावासुदेवानुचिंतयादेहाद्युपाधिस्थंस्वप्रकाशंआत्मानंआत्मनैवविचारय

एवंकृतेविप्रनोदितः तक्षकः त्वांनधक्ष्यति अपिच योऽहंसब्रह्मैवयत्ब्रह्मतत् अहमेव एवंसमीक्षन्निरुपाधौआत्मनिआ-
त्मानं आधायपादेविषाननैः दशंतंतक्षकंशरीरंविश्वंच आत्मनः पृथक्नद्रक्ष्यसि एतत्तेकथितंतात यथात्मापृष्टवान्नृपहृ
रेर्विश्वात्मनश्चेष्टां किंभूयः श्रोतुमिच्छसि इतिद्वादशेपंचमः ५ सूतउवाच एवंराजापरीक्षित् शुकोक्तंनिशम्य
तत्पादपद्मंउपसृत्य बद्धांजलिः सन् इदंआह राजोवाच हेमुने अहंभवताऽनुगृहीतः कृतार्थोऽस्मि यतः मेहरिःश्रा
वितः किंच मत्तुल्येषु अन्येषु अनुग्रहइतियत् तत् अच्युतात्मनांवः नाद्भुतंमन्ये किंच एतांपुराणसंहितांत्वत्तः वयंश्रुतवंतः
यस्यांउत्तमश्लोकोवर्ण्यते हेभगवन् त्वयादर्शितंब्रह्म प्रविष्टोऽहम् अतः तक्षकादिमृत्युभ्यः नबिभेमि हेब्रह्मन् अहंइं
द्रियाणिनियम्य मुक्तकामाशयंचेतः अधोक्षजे प्रवेश्य प्राणान् विसृजामि अनुज्ञांदेहि किंच त्वया भगवतः क्षेमंपदंदर्शि
तम् अतएव मेअज्ञानंज्ञानविज्ञाननिष्ठयानिरस्तम् सूतउवाच एवमुक्तः शुकः तंआज्ञाप्य राज्ञापूजितः सन्
भिक्षुभिः सार्द्धंजगाम परीक्षिदपि आत्मनिबुद्ध्यामनः समाधाय परमात्मानंदध्यौ प्राक्कूले बर्हिष्यासीनो गंगाकूलउद
ङ्मुखः ब्रह्मभूतो महायोगी निःसंगश्छिन्नसंशयः बभूव तदा हेविप्राः क्रुद्धेन द्विजपुत्रेण प्रेरितः तक्षकः नृपंहंतुकामः गच्छ
न्पथि विषहारिणं कश्यपंदृष्ट्वा तंच द्रव्यैः संतर्प्य निवर्त्यच द्विजरूपछन्नः सन् नृपं अदशत् तदा ब्रह्मभूतस्य राज्ञः देहःवि
षाग्निना भस्मसात् बभूव तदा सर्वत्र महान् हाहाकारः आसीत् सर्वेदेवाद्याः विस्मिताः अभवन् देवदुंदुभयोनेदुः गंधर्वा
प्सरसोजगुः ववृषुः पुष्पवर्षाणि विबुधाः साधुवादिनः अथजनमेजयः तक्षकभक्षितंस्वपितरं श्रुत्वा क्रुद्धः सन् द्विजैःसह
सर्पान्सत्रे आजुहाव तस्मिन्सत्रे दंदह्यमानान् महोरगान् दृष्ट्वा भीतस्तक्षकः इंद्रंशरणंययौ तदा राजातक्षकं अपश्यन् द्विजाना

ह हेद्विजाः तक्षकः कस्मात् न दह्यते ऊचुः हेनृप तं इंद्रः रक्षति अग्नौ न पतति एवं श्रुत्वा नृपः ऋत्विजः आह हेद्विजाः सेंद्रः तक्ष
कः अग्नौ किमिति न पात्यते ततः विप्राः राजवचः श्रुत्वा अत्र मखे सेंद्रं तक्षकं जुहुवुः तक्षकाशु पतस्वेह सहेंद्रेण मरुत्वता-
इति ब्राह्मणोच्चैः परुषवाक्यैः सविमानः स तक्षकः इंद्रः स्थानात् प्रचलितो बभूव अंबरात्पतंतं इंद्रं विलोक्य बृहस्पतिः राजा-
नं प्राह हेराजन् अयं सर्पराट् वधं नार्हति यतः अनेन अमृतं पीतं वा अजरामरोस्ति किंच जंतोः जीवितं मरणं परलोकगतिः
स्वकर्मणैव भवति अतः सुखदुःखप्रदाता अन्यस्य अन्यः न सर्पचोरादिभिः जंतुः मृत्युं प्राप्नोतीति यत् तदारब्धं कर्मैव भुंक्ते इ
ति हेतोः इदं आभिचारिकं सत्रं समाप्यताम् हेनृप अनागसः सर्पाः दग्धाः तदपि जनैः दिष्टं भुज्यते एवमुक्तः नृपः सर्पसत्रात् उ
परतः सन् बृहस्पतिं पूजयामास ननु कथं विदुषामपि एवं मोहः यतो ब्रह्मकोपाद्राज्ञः मृत्युर्जनमेजयात् सर्पाणां इत्यादि तत्रा
ह सैषा विष्णोः महामाया अनया प्राणिनः बाध्यबाधकतां व्रजंति कथं तर्हि मायानिवृत्तिः ईश्वरभजनादित्याह यत्र स्वरूपे इ
यं माया अभयान विराजते तत्परं पदं आमनंति येषां अहं ममेति दौर्जन्यं न ते एतत्पदं अधिगच्छंति अस्य प्राप्त्युपायमाह अ
तिवादांस्तितिक्षेत नावमन्येत कंचन नचेमं देहमाश्रित्य वैरं कुर्वीत केनचित् शास्त्रांते गुरुं प्रणमति सूतः यत्पादांबुरुहध्या
नात् इमां संहितां प्राप्तोऽस्मि तस्मै व्यासाय नमः शौनकउवाच व्यासशिष्यैः पैलादिभिः वेदाः कतिधा व्यस्ताः तद्ब्रू
हि सूतउवाच आदौ ब्रह्मणः हृदयाकाशात् नादः अभूत् तस्मात् त्रिवृदोंकारः येन बृहती वैखरी वाक् व्यज्यते तस्य
त्रयो वर्णाः आसन् तेभ्यः अक्षरसमुदायं अंतस्थोष्मादिं असृजत् तेन समुदायेन ब्रह्मा चतुर्मुखैः चतुरो वेदान सृजत् ततः ब्रह्मा ५
स्वपुत्रान् मरीच्यादीन् प्रति वेदान् अध्यापयत् ते च स्वपुत्रेभ्यः समादिशन् एवं चतुर्युगेषु वेदाः तच्छिष्यैः परंपरया प्राप्ताः ततः क्षी

णायुषः मंदबुद्धीन् जनान् वीक्ष्यते वेदाः द्वापरांते महर्षिभिः व्यस्ताः अथ अस्मिन् मन्वंतरे ब्रह्मेशानादिभिः धर्मगुप्तये प्रार्थि
तः भगवान् पराशरात् सत्यवत्यां अंशेन अवतीर्णः सन् चतुर्विधं वेदं चक्रे चातुर्विध्यमेवाह ऋगादिमंत्राणां राशीन् तत्तत्प्रक
रणभेदैः उद्धृत्य तैर्मंत्रैः चतस्रः संहिताः चक्रे ततो व्यासः चतुरः शिष्यानाहूय तेभ्यः ताः ददौ पैलाय ऋक्संहितां वैशंपायना
यनिगदाख्यां यजुःसंहिताम् जैमिनये छंदोगाख्यां सामसंहिताम् सुमंतवे अथर्ववेदस्य अथर्वांगिरसीं नाम संहितां ददौ
तत्र पैलः स्वसंहितां द्वेधा विभज्य इंद्रप्रमितये बाष्कलाय च आह सः बाष्कलः स्वां संहितां चतुर्धा व्यस्य बोध्य याज्ञवल्क्य परा
शराग्निमित्रेभ्यः चतुर्भ्यः प्राह इंद्रप्रमितिः स्वां संहितां स्वसुतं मांडूकेयमध्यापयामास तच्छिष्यः देवमित्रः सौभर्यादिभ्यः
तां ऊचिवान् मांडूकेयसुतः शाकल्यः तां पंचधा व्यस्य वात्स्य मुद्गल शालीय गोखल्य शिशिरान् प्राह शाकल्यशिष्यः जा-
तूकर्ण्यः स्वसंहितां त्रेधा विभज्य निरुक्तं चतुर्थं कृत्वा बलाक पैज वैताल विरजेभ्यः ददौ ततः पूर्वोक्त बाष्कलस्य पुत्रः बाष्कलिः
सर्वशाखाभ्यः वालखिल्याख्य संहितां चक्रे तां बालायन्यादयः विभज्य द्वौ द्वौ अधीतवंतः कासारश्च एताः बह्वृचाः संहिताः
एभिः ऋषिभिः धृताः एषां छंदसां विभागं श्रुत्वा सर्वपापैः प्रमुच्यते यजुर्वेदे तैत्तिरीयशाखोत्पत्तिप्रसंगमाह अथ वैशंपान
नस्य शिष्याः चरकाध्वर्यवः अभवन् यतः स्वगुरोः ब्रह्महत्यानाशनं व्रतं चेरुः अतः चरका इति नाम किंच तच्छिष्यः याज्ञव
ल्क्यः आह हे वैशंपायन एतेषां चरितेन कियत् सुदुश्चरमपि अहं चरिष्यामि एवमुक्तो गुरुः कुपितः सन् आह हे शिष्य मदधी
तं त्यक्त्वा याहि त्वया अलम् ततः याज्ञवल्क्यः यजुर्गणं छर्दित्वा गतः तत् छर्दितं दृष्ट्वा मुनयः तित्तिराः भूत्वा तत् आददुः ततो हेतोः
तैत्तिरीयाः यजुःशाखाः आसन् अथ याज्ञवल्क्यः गुरोः अलब्धवेदः सन् सूर्यं उपतस्थे हे भगवन् ते आदित्याय नमो नमः यः त्वं एक

एवइमांलोकयात्रां अनुवहसि हे भग वं॰ त्रिभुवनगुरुभिः वंदितंनवचरणकंजयुगं अयातयामयजुः कामोहंभजामि सूतउवा
च एवंस्तुतःवाजिरूपधरः सूर्यःयजूंषिमुनयेप्रादात् ततोयाज्ञवल्क्यः तैर्यजुर्भिः पंचदशशाखाः अकरोत् ताः वाजसन्यः
शाखाः काण्वमाध्यंदिनाः जगृहुः सामशाखाविभागमाह जैमिनेःसुतः सुमंतुः तस्यसुतः सुन्वान् ताभ्यांएकैकांसंहितांप्राह जै
मिनिशिष्यःसुकर्मापिसामवेदस्य सहस्रं संहिताभेदं चक्रे ततः सुकर्मणःशिष्याः त्रयः हिरण्यनाभः १ पौष्यंजिः २ आवंत्यः एतेताः
संहिताः जगृहुः तेषांशिष्याःप्रत्येकं ५०० तेतावतीः शाखाःयथायथंजगृहुः ततःपौष्यंजिशिष्याः ५ लौगाक्षिः १ मांगिलिः २ कुल्यः ३ कु
शीदः ४ कुक्षिः ५ एतेप्रत्येकं शतंशतंसंहिताःजगृहुः हिरण्यनाभस्य अन्यः कृतनामाशिष्यः संहिताः २४ स्वशिष्येभ्यःऊचे आवंत्यःशे
षाःसंहिताःशिष्येभ्यःआह इतिद्वादशेषष्ठः ६ सूतउवाच अथाथर्ववेदविभागमाह सुमंतुःकबंधनामानंशिष्यंस्वसं
हितांप्राह सोपितांद्वेधाविभज्यपथ्यायवेददर्शायचदत्तवान् वेददर्शशिष्याः ४ शौल्कायनिः १ ब्रह्मबलिः २ मोदोषः ३ पिप्पलायनिः
४ एभ्यःसंहिताः ४ ददौ अथपथ्यःशिष्येभ्यः ३ कुमुदशुनकजाजलिभ्यः स्वसंहितांत्रेधाविभज्यप्रादात् शुनकःस्वशिष्याभ्यांब
भ्रुसैंधवायनाभ्यांसंहितेद्वेप्राह तौसावर्ण्यादिभ्यःऊचतुः अथपौराणिकान्शृणु आदौव्यासःषट्पुराणसंहिताःकृत्वामत्पित्रेरो
महर्षणायददौ तन्मुखात्त्रय्यारुणिः १ कश्यपः २ सावर्णिः ३ अकृतव्रणः ४ वैशंपायनः ५ हारीतः ६ इमेषट्पौराणिकाःसंहिताःप
ठ् अधीयंत एषांषण्णांशिष्यःअहंताःसर्वाःअधीतवान् कश्यपः १ अहं २ सावर्णिः ३ अकृतव्रणः एतेवयंव्यासशिष्यात् मूल ६
संहिताः अधीमहि हे शौनक अथपुराणलक्षणंशृणु सर्गः १ विसर्गः २ वृत्तिः ३ रक्षा ४ अंतरम् ५ वंशः वंश्यानुचरित
म् ६ संस्था ७, ८ हेतुः ९ आश्रयः १० एभिर्दशलक्षणैः युक्तंमहापुराणम् पंचलक्षणंअल्पमिति एषांअर्थमाह मह

औ॰ १ संस्थासब्देनलयप्रुतस्योर्ग्रहणं, ऊतयः

द्वादीनांकारणानांसृष्टिःसर्गइत्युच्यते १ चराचरप्राणिसर्गोविसर्गः २ ईश्वरेणभूतानांविहितायाजीविकासावृत्तिः ३ भगवतः
याअवतारलीलासारक्षा ४ मन्वंतरंमनुर्देवाइत्यादिषुषड्विधंमन्वंतरम् ५ ब्रह्मराज्ञांप्रसूतिःवंशःतद्वंशजानांवृत्तिंवंश्यानुच
रितम् ६ चतुर्विधःप्रलयःसंस्था अस्यजगतःसर्गादेःनिमित्तम् योजीवःसोऽत्रहेतुः ज्ञेयःजाग्रदाद्यवस्थासुयस्यव्यतिरेका
न्वयः तत्ब्रह्मआश्रयइत्युच्यते एवंलक्षणलक्ष्याणिपुराणानि १८ मुनयःप्राहुःतानि ब्राह्मं १ पाद्मं २ वैष्णवम् ३ शैवं ४ लैं
गम् ५ गारुडम् ६ नारदीयं ७ भागवतं ८ आग्नेयं ९ स्कांदं १० भविष्यं ११ ब्रह्मवैवर्तम् १२ मार्कंडेयम् १३ वामनम् १४ वाराहम्
१५ मात्स्यम् १६ कौर्मं १७ ब्रह्मांडमिति १८ ब्रह्मन्निदंसमाख्यातंशाखाप्रणयनंमुनेः शिष्यशिष्यप्रशिष्याणांब्रह्मतेजोवि
वर्धनम् इतिद्वादशेसप्तमः ७ शौनकउवाच हेसूतत्वंचिरंजीव यतःसंसारेभ्रमतांनृणांत्वंतन्निवर्त्तकः असिपु
राणविभागप्रसंगात् तत्कर्तुःमार्कंडेयस्यचरितं पृच्छति शौनकःसर्वेजनाःमार्कंडेयंचिरायुषआहुःयःकल्पांतेउर्वरितःये
नकल्पांतेन इदंजगत् ग्रस्तम् इदंकथंजातम् किंच एकएवअर्णवे भ्राम्यत् वटपत्रपुटे शयानंबालकंददर्श इदमपि अघटि
तम् एवंतद्विषयेनः संशयोऽस्तितंछिंधि सूतउवाच हेशौनकअयंप्रश्नःलोकभ्रमापहः त्वयाकृतः यत्रनारायणक
थागायते अथप्राप्तद्विजातिसंस्कारः मार्कंडेयः छंदांसि अधीत्यनैष्ठिकब्रह्मचारीजटिलः कमंडलुंदंडंउपवीतंमेखलांबि-
भ्रत् अग्न्यर्कगुरुविप्रात्मसुहरिं अर्चयत् तपःस्वाध्यायपरः भैक्ष्यमाहृत्यगुरवेनिवेद्यतदनुज्ञयास्वयंभुंजन् नोचेत् उ-
पोषितःसन् वर्षाणामयुतायुतंहृषीकेशंआराधयन् दुर्जयंमृत्युंजिग्ये तत्तपसाब्रह्माद्याःविस्मिताआसन् एवंयोगेन-
चित्तंयुंजतः तस्यमन्वंतरषडात्मकः कालः व्यतीयाय एतत् ज्ञात्वाइंद्रःसप्तमेमन्वंतरे मत्पदंग्रहीष्यतीतिशंकितःसन्

तत्तपोनाशाय गंधर्वाप्सरसः काम[illegible]वसंतं मलयानिलं लोभमदौच मुनये प्रेषयामास तेवैतदाश्रमं जग्मुः हिमाद्रेःपार्श्वउत्तरे पुष्पभद्रानदी यत्र चित्राख्याच शिलाविभो तदाश्रमपदंपुण्यं पुण्यद्रुमलतान्वितम् मत्तद्विजकुलाकुलं एवंभूतं आश्रमं तेइंद्रकिंकराः गत्वातत्रासीनं अग्निमिव दुर्धर्षं ऋषिं दृष्ट्वा तस्य पुरतः स्त्रियः ननृतुः गायकाः जगुः कामः धनुषि अस्त्रं संदधे तदैव क्रीडंत्याः पुंजिकस्थल्याः कंदुकं अनुभ्रमतः दृष्टेः तस्याः सूक्ष्मंवासः वायुर्जहार तदास्मरः मुनौ बाणंविससर्ज तत्रइदंसर्वंव्यर्थं अभवत् ततः ऋषितेजसा दह्यमानाः कामाद्याः निववृतुः ततःइंद्रः सगणं कामंनिस्तेजसं दृष्ट्वा ऋषेः अनुभावंश्रुत्वा विस्मयंप्राप एवंतपआदिभिः चित्तंयुंजतः तस्य अनुग्रहाय नरनारायणोहरिः आविरासीत् तौशुक्लकृष्णौचतुर्भुजौ कंजनेत्रौ रौरववल्कलांबरौ साक्षात्तपोरूपिणौ नरनारायणौ ऋषी दृष्ट्वा उत्थाय तौ दंडवत् ननाम तद्दर्शनात् प्रहृष्टरोमाऋषिः अश्रुपूर्णाक्षः सन् उत्थाय प्रांजलिः गद्गदाक्षरः तौनमोनमइति बभाषे ततः तयोः आसनंदत्वा पादौप्रक्षाल्य तौअपूजयत् पुनःप्रणम्यइदमब्रवीत् हेविभो त्वांअहं कथंस्तौमि यतः त्वयैवप्रेरिताः प्राणेंद्रियादयः चलंति अतःनकस्यापिस्वातंत्र्यम् हेभगवन् त्वंइमेमूर्तीत्रिलोक्याः क्षेमाय बिभर्षि तथा अन्यतनूश्च एवंभूताय नारायणाय ऋषये नमोऽस्तु किंच कपटेंद्रियमार्गैः भ्रमद्धीः पुरुषः सेंद्रियादिषु संतमपि त्वांनवेद एवंभूतं महापुरुषं त्वांवंदे इतिद्वादशेअष्टमः॥८॥

सूतउवाच इत्थं मार्कंडेयेन संस्तुतः नरसखः नारायणः प्रीतःसन् भृगूद्वहं आह भोभोब्रह्मर्षिवर्य त्वंतपआदिभिः सिद्धोऽसि वयंतेतुष्टाः स्म तेभद्रमस्तु ईप्सितंवरंवरय मार्कंडेयउवाच हेअच्युत यत् तेदर्शनंजातं एतावतावरेण अलम् अथापि हेपुण्यश्लोकशिखामणे त्वन्मायांद्रष्टुमिच्छामि सूतउवाच ईश्वरःतथेत्युक्त्वाबदर्या-

श्रमं अगात् ततः ऋषिः तमेवार्थं चिंतयन् स्वाश्रमे एव वसन् सर्वत्र हरिं ध्यायन् मनोमयैः द्रव्यैः तं अपूजयत् कदाचित्प्रेमोद्रेकंप्रा-
प्तः सन् पूजां विसस्मार हे शौनक एकदा तस्य उपासीनस्य सतः संध्यायां महान् वायुः अभूत् तमनु मेघाः तडिद्भिः गर्जतः आ
विर्बभू[illegible] वर्षधाराश्च मुमुचुः ततः चतुः समुद्राः क्ष्मातलं ग्रसंतः व्यदृश्यंत ततः आत्मना सह चतुर्विधं जगत् भीतम् तथा
जलाप्लुतां क्ष्मा[illegible] वीक्ष्य मुनिः समत्रसत् ततः सर्वत्र त्रैलोक्यं जलाप्लुतं आसीत् सः एक एव उर्वरितः जटाः विकीर्य जडांधव-
त् बभ्राम क्वचित् सः ऋषिः मकरादिभिः उपद्रुतः तरंगैस्ताडितः यादोभिः भक्षितः क्वचित् शोकं क्वचित् मोहं सुखं दुःखं मृ
त्युं आप्नोति एवं तत्र भ्रमतः तस्य अयुतायुतवर्षाणि व्यतीयुः सः कदाचित् तत्र भ्रमन् पृथिव्याः उच्चदेशे न्यग्रोधपोतं द
दृशे तस्य ईशानदिक्शाखापत्रपुटे शयानं कंबुग्रीवं मरकतश्यामं हस्ताभ्यां चरणांगुष्ठं मुखे निधाय चुंबंतं बालं मुकुंदं वी
क्ष्य तद्दर्शनात् गतश्रमः प्रहृष्टरोमा मार्कंडेयः तं बालं प्रष्टुं पुरः प्रससार तावत् शिशोः श्वसितेन मशक इव तदंतः आविशत्
तदुदरे गतः सन् पूर्ववत्सर्वं ब्रह्मांडं स्वाश्रमं च दृष्ट्वा विस्मितः आस एतर्ह्येव शिशोः श्वासात् बहिर्निर्गतः सन् लयाब्धौ अ
पतत् पुनः पृथिव्याः ककुदि वटं तत्पर्णपुटे शयानं तोकं च वीक्ष्य तेन निरीक्षितः सन् तं अधोक्षजं परिष्वक्तुं अभ्यगात् तावत्
भगवान् अंतर्दधे तमनु वटः सलिलं लोकसंप्लवः सद्यः तिरोधायि स च स्वाश्रमे पूर्ववत् स्थितः इति द्वादशे नवमः ९
सूत उवाच सः ऋषिः एवं नारायणनिर्मितं योगमायावैभवं अनुभूय तमेव शरणं ययौ मार्कंडेय उवाच हे हरे ते अं
घ्रिमूलं प्रपन्नाभयप्रदं प्रपन्नोऽस्मि सूत उवाच एकदा रुद्रः रुद्राण्या स्वगणैश्च वृतः वृषेण दिवि पर्यटन् तं ददर्श अ
थ उमा तं ऋषिं मार्कंडेयं वीक्ष्य शि[illegible] भाषत हे शिव एनं तपस्विनं विप्रं पश्य पश्य भवान् सिद्धिदः अस्य तपसः सिद्धिं कुरु शि

वउवाच हेदेवि अयंऋषिः भग [पंतं] तपरां भक्तिंप्रासः अतः आशिषः मोक्षमपिनेच्छति अथापिजनः साधुसमागमः परोला
भः एतेन संवदिष्यामः इत्युक्त्वा नत्समीपंययौ तदाऋषिः रुद्धेंद्रियःसन् तयोः आगमनंनवेद तन् ज्ञात्वा शिवः तद्गुहाकाशं-
आविशत् तदामुनिः आत्मनि प्रासंत्र्यक्षं दशभुजंव्याघ्रचर्मांबरंशिवंवीक्ष्य ऋषिःविस्मितःकिमिदंकुतएवेतिसमाधेःवि
रतःसन् नेत्रेउन्मील्यउमयागणैश्चयुतंशिवंदृष्ट्वाननाम ततः तस्मै सपर्यांव्यधात् पूर्णकामस्यते किंकर वामइत्याह ततः
तेशिवायशांतायसत्वायनमइति अस्तौत् सूतउवाच एवंस्तुतःशिवः तुष्टःसन् तंऋषिंआह शिवउवाच
हेऋषे कामंवरं वृणीष्व एवंउक्त्वाब्राह्मणान् स्तौति हे मुने ये ब्राह्मणाः साधवः अस्मासु एकांतभक्ताः निर्वैरा श्चतान् लोक
पालाः अहंब्रह्माहरिश्च एतेवदंति अर्चंति उपासते एवंभूताः येसाधवः तेमयि अच्युतेअजेच भेदंनपश्यंति अतः युष्मान्
भजेम नह्यम्मयानितीर्थानिनवेदाश्चेतनोज्झिताः तेपुनंत्युरुकालेन यूयंदर्शनमात्रतः अतएवब्राह्मणेभ्योनमस्यामः किं
च येषांश्रवणात् दर्शनात् पातकिनोपि शुध्येरन् तेषां संभाषणादिभिः शुध्यंतीतिपुनः किंवक्तव्यं सूतउवाच एवंशि
ववचः शृण्वन् अपिऋषिः नातृप्यत् सःविष्णोः माययाकर्शितः शिववागमृतेनक्लेशहीनः सन् तंउवाच अहोइयंईश्वरचर्या
दुर्विभाव्या यतः ईश्वरा अपिईशितव्यानि भूतानिनमंति स्तुवंति इदंसर्वलोकसंग्रहमात्रम् एतावता भगवतः तवप्रभावः
नदुष्येत मायिनः कुहकंयथा हेईश्वर एवंभूतायतुभ्यंगुरुवेनमोस्तु किंच हेईशवर ददर्शनात् त्वत्तः परंकंनुवरं वृणे अथापिभग
वतित्वयिसाधुषुचस्थिरांभक्तिंइमंवरं वृणे सूतउवाच एवंस्तुतः शर्वः ऋषिंआह हेमुने अयंतेकामः अस्तु आकल्पांतंयशः
तथाअजरामरता त्रैकालिकंज्ञानं वैराग्यंविज्ञानंपुराणाचार्यताचतेअस्तु सूतउवाच एवंवरान् दत्वातस्मैदेव्यैकथयन्

शिवः अगात् ततः ऋषिः हरौ एकांततां गतः सन् अधुनापि विचरति हे शौनक एतत् मार्कंडेयस्य चरितं ते अनुवर्णितम् ए...यः
शृणुयात् श्रावयेत् तयोः संसृतिः न भवेत् इति द्वादशे दशमः १० शौनक उवाच हे सूत अथ भवंतं इममेव अर्थं पृच्छा
मः यथा तांत्रिकाः श्रियः पतेः उपासनायां विषये अंगोपांगायुधाकल्पं यथा यैस्तत्त्वैः कल्पयंति तत् नो वर्णय ते भद्रमस्तु सू
त उवाच गुरून्नमस्कृत्य वैष्णवीः विभूतीः वक्ष्ये मायाद्यैः नवभिस्तत्त्वैः षोडशविकारात्मको विराट् निर्मितः यत्र इदं त्रिभु
वनं दृश्यते एतत् पौरुषं रूपं विद्यात् अस्यांगकल्पनामाह भूः पादौ द्यौः शिरः नभः नाभिः सूर्यः अक्षिणी वायुः नासे दिशः कर्णौ
...जो... ...तः मेढ्रम् मृत्युः गुदम् लोकपालाः बाहवः चंद्रो मनः यमः भ्रुवौ लज्जा उत्तरोष्ठः लोभः अधरोष्ठः ज्योत्स्ना दंताः भ्रमः हास्यं द्रु
...रोमाणि मेघाः केशाः यावान् अयं सप्तवितस्तिमितः पुमान् तावान् असौ प्रोक्तः किंच कौस्तुभमिषेण भगवान् शुद्धं चैतन्यं बिभर्ति
कौस्तुभप्रभैव श्रीवत्सं बि० स्वमायां वनमालां बि० छंदोमयं पीतं वासः बिभ० प्रणवरूपं ब्रह्मसूत्रं बि० सांख्ययोगरूपे कुंडले बि० ब्र
ह्मलोकं मुकुटं बि० प्रधानं शेषाख्यमासनं बि० प्राणतत्त्वं गदां बि० अपांतत्त्वं शंखं० तेजस्तत्त्वं सुदर्शनं० नभस्तत्त्वं असिं० तमोमयं
चर्म० कालरूपं धनुः० कर्ममयं इषुधिं० इंद्रियाणि शरान्० क्रियायुक्तं मनः रथं० शब्दादीन् रथाभिव्यक्तिं० षड्गुणैश्वर्यं लीलापद्मं०
धर्मयशसी चामरव्यजने० छत्रं वैकुंठं० वेदत्रयरूपं गरुडं वाहनं० भगवच्छक्तिं श्रियं० पंचरात्राद्यागमनं विष्वक्सेनं अणिमाद्याः गु
णाः ८ ते द्वारपालाः वासुदेवः संकर्षणः प्रद्युम्नः० अनिरुद्धः इति मूर्तिव्यूहः ज्ञेयः स एव चतुर्मूर्तिः ईश्वरः विश्वतैजसप्राज्ञतुरीय-
इति वृत्तिभिः परिभाव्यते एवंभूतः हरिः स्वमायया इदं सृजति हरति पाति अतः तं प्रार्थयते हे गोविंद हे अर्जुनसखे नः मृत्यान् पाहि
इदं यः पठेत् सः हृदिस्थं ब्रह्म पश्यति ...क उवा... शु...कः विष्णुरातायसौ रोगणः मासि नाना सप्त कः वसतीति यत् आह तेषां ना
अो० २ अंगानि पादादीनि उपांगानि गरुडादीनि आयुधा... ...गनादीनि आकल्पाः कौस्तुभादयः

मानिकर्मोणिनःब्रूहि सूतउवाच एष वा एव सूर्यः भगवद्रूपीमध्वादिषुमासेषुलोकतंत्रायद्वादशभिर्गणैःचरति तदेवाह धाता
सूर्यःकृतस्थली अप्सराः हेतिः राक्षसः वासुकिः नागः रथकृद्यक्षः पुलस्त्यः ऋषिः तुंबरुः गंधर्वः एतेचैत्रं अनुवर्तयंति अर्यमासूर्यः
पुंजिकस्थली॰ प्रहेतिरा॰ कच्छनीरः ना॰ अथौजाः य॰ पुलहः ऋ॰ नारदः गं॰ एते वैशाखं अ॰ मित्रः सूर्यः मेनका॰ अ॰ पौरुषेयः रा॰ त
क्षकः ना॰ रथसेनः य॰ अत्रिः ऋ॰ हाहाः गं॰ एतेज्येष्ठं अ॰ वरुणः सू॰ रंभा अ॰ चित्रस्वनः रा॰ शुक्रः ना॰ सहजन्यः य॰ वसिष्ठः ऋ॰ हू
हूः गं॰ एते आषाढं॰ इंद्रः सू॰ प्रम्लोचा अ॰ वर्यः रा॰ एलापत्रः ना॰ श्रोताय॰ अंगिराः ऋ॰ विश्वावसुः गं॰ एते श्रावणं॰ विवस्वान् सू॰ अ
नुम्लोचा अ॰ व्याघ्रः रा॰ शंखपालः ना॰ आसारणः य॰ भृगुः ऋ॰ उग्रसेनः गं॰ एते भाद्रपदं॰ पूषा सू॰ घृताची अ॰ वातः रा॰ धनं
जयः ना॰ सुरुचिः य॰ गौतमः ऋ॰ सुषेणः गं॰ एते माघं॰ पर्जन्यः सू॰ सेनजित् अ॰ वर्चाः रा॰ ऐरावतः ना॰ ऋतुः य॰ भरद्वाजः ऋ॰
विश्वः गं॰ एते फाल्गुनं॰ अंशुः सू॰ उर्वशी अ॰ विद्युच्छत्रुः रा॰ महाशंखः ना॰ तार्क्ष्यः य॰ कश्यपः ऋ॰ ऋतसेनः गं॰ एते मार्ग-
शीर्षं॰ भगः सू॰ पूर्वचित्तिः अ॰ स्फूर्जः रा॰ कर्कोटको ना॰ ऊर्णः यः आयुः ऋ॰ अरिष्टनेमिः गं॰ एते पौषं॰ त्वष्टा सू॰ तिलोत्तमा
अ॰ ब्रह्मापेतः रा॰ कंबलः नागः शतजित् य॰ जमदग्निः ऋषिः धृतराष्ट्रः गंधर्वः एते आश्विनं॰ विष्णुः सूर्यः रंभा अ॰ मखापेतः रा॰
अश्वतरः ना॰ सत्यजित् यक्षः विश्वामित्रः ऋषिः सूर्यवर्चाः गंधर्वः एते कार्त्तिकं अनुवर्तयंति एताः आदित्यविभूतयः स्मरतां
पापं हरंति असौ सूर्यः मासेषु चरन् जनस्य शुभां मतिं तनुते एनं सूर्यं वेदैः ऋषयः स्तुवंति गंधर्वाः गायंति अप्सरसः पुरतः नृ
त्यंति नागाः रथबंधनरज्जवः यक्षाः रथं योजयंति राक्षसाः पृष्ठतः रथं नोदयंति वालखिल्याः ६०००० पुरतः अभिमुखं स्तु
वंति एवं ह्यनादिनिधनो भगवान् हरिरीश्वरः कल्पे कल्पे स्वमात्मानं व्यूह्य लोकानवत्यजः इति द्वादशे एकादशः ११